JHARKHAND
ACADEMIC COUNCIL

MODEL QUESTION PAPER

2023

aglasem.com

झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची, झारखण्ड

वार्षिक परीक्षा 2022-23

आदर्शप्रश्नपत्रम् (बहुविकल्पीयाः प्रश्नाः)

कक्षा-11 विषय: - संस्कृतम् समय-1 घंटा पूर्णांकाः - 40

सामान्यनिर्देशा: -

- अस्मिन् प्रश्नपत्रे चत्वारिंशत् (40) प्रश्नाः। (इस प्रश्न-पत्र में 40 प्रश्न हैं।)
- सर्वे प्रश्नाः अनिवार्याः। (सभी प्रश्न अनिवार्य हैं।)
- प्रत्येकप्रश्नार्थं एकोऽङ्को निर्धारितः। (प्रत्येक प्रश्न के लिए एक अंक निर्धारित है।)
- प्रत्येकप्रश्नस्य चत्वारो विकल्पाः। उचितविकल्पं चिनुत। (प्रत्येक प्रश्न के चार विकल्प दिए गए हैं। उचित विकल्प का चयन करें।)
- अनुचितोत्तरार्थं कोऽपि नकारात्मकाङ्को नास्ति । (गलत उत्तर के लिए कोई नकारात्मक अंक नहीं है।)

खण्ड-क

अपठितावबोधनम्

अधोलिखितं गद्यांशं पठित्वा विकल्पेभ्य: उचितमुत्तरं चिनुत-

छात्रावस्थायां तु अध्ययनस्य अनिवार्यता भवति, अन्यथा अध्ययनेन विना विद्यार्थी सत्यार्थेषु विद्यां ग्रहीतुं न पारयति। अध्ययनस्य स्थानं मानवजीवने तावदेव महत्वपूर्णम् अस्ति, यावत् कस्याश्चित् नद्याः पारे गन्तुं कस्याश्चित् तरण्याः भवति। यथा उच्छलन्त्या: तटिन्याः पारे गन्तुम् एका नौका विशालम् आश्रयत्वं प्राप्नोति, तथैव अध्ययनमपि मानवजीवनं सौख्यप्रदं विधातुम् एकोऽति महान् आश्रय: अस्ति।

1. छात्रावस्थायां कस्य अनिवार्यता भवति?
   क. अध्ययनस्य ख. क्रीडनस्य ग. भ्रमणस्य घ. आश्रमस्य
2. अध्ययनेन विना कां ग्रहीतुं न पारयति?
   क. लतां ख. वसुधां ग. विद्यां घ. नौकां
3. उच्छलन्त्या: तटिन्याः पारे गन्तुं का विशालम् आश्रयत्वं प्राप्नोति?
   क. विद्या ख. नौका ग. विद्यार्थी घ. छात्रा
4. मानवजीवनं सौख्यप्रदं विधातुम् -------- महान् आश्रय: अस्ति ।
   क. अध्ययनं ख. नौका ग. मानव: घ. नदी
5. तथा + एव = ------?

schools.aglasem.com

aglasem.com

क. तदैव ख. तथैव ग. तथाएव घ. सदैव

खण्ड-ख

पठितावबोधनम्

अधोलिखितं गद्यांशं पठित्वा विकल्पेभ्य: उचितमुत्तरं चिनुत-

अस्ति कालिन्दीतीरे योगिनीपुरं नाम नगरम्। तत्र अलावदीनो नाम यवनराजो बभूव। स चैकदा केनापि निमित्तेन महिमासाहिनाम्ने सेनानिने अकुप्यत्। स च यवनस्वामिनं प्रकुपितं प्राणग्राहकं च ज्ञात्वा चिन्तयामास, सामर्षो राजा विश्वसनीयो न भवति। तदिदानीं यावदनिरुद्धोऽस्मि तावदेवेतः क्वापि गत्वा निजप्राणरक्षां करोमीति परामृश्य सपरिवार: पलायित:।

6. यवनराज्ञः नाम किम् आसीत्?
   क. अलावदीनः ख. योगिनीपुरं ग. महिमासाहि: घ. यवनराज:
7. योगिनीपुरं नाम नगरं कुत्र आसीत्?
   क. गंगातीरे ख. नगरे ग. कालिन्दीतीरे घ. पर्वततीरे
8. कीदृशो राजा विश्वसनीयो न भवति?
   क. दयालु: ख. सामर्षो ग. हर्षितो घ. वृद्धो
9. कः पलायितः?
   क. महिमासाहि: ख. यवनराजः ग. राजा घ. अलावदीनः
10. 'गत्वा' इति पदे कः प्रत्यय:?
    क. तुमुन् ख. क्त ग. ल्यप् घ. क्त्वा

अधोलिखितं पद्यांशं पठित्वा विकल्पेभ्य: उचितमुत्तरं चिनुत-

देवागारे पिहितद्वारे

तमोवृतेऽस्मिन् भजसे कम्?

त्यज जपमालां त्यज तव गानं

नास्त्यत्रेश: स्फुटय दृशम्।।

11. कवे: अनुसारम् ईशः कुत्र नास्ति?
    क. हृदये ख. गृहे ग. देवागारे घ. ग्रामे
12. कवि: किं त्यक्तुं कथयति?
    क. गानं ख. वृत्तं ग. नगरं घ. द्वारं

schools.aglasem.com

aglasem.com

13. किं स्फुटय?

क. दृशं ख. कर्णं ग. देवागारं घ. भजनं

14. 'पिहितद्वारे' इति पदे का विभक्तिः?

क. प्रथमा ख. तृतीया ग. सप्तमी घ. पञ्चमी

15. नास्ति + अत्र + ईशः = ------

क. नास्तीशः ख. नासत्यत्रेशः ग. नास्तिईशः घ. नास्त्यत्रेश:

अधोलिखितं नाट्यांशं पठित्वा विकल्पेभ्य: उचितमुत्तरं चिनुत-

(ततः प्रविशति दारकं गृहीत्वा रदनिका)

रदनिका - एहि वत्स! शकटिकया क्रीडावः।

दारकं - (सकरुणम्)

रदनिके! किं मम एतया मृत्तिकाशकटिकया?

तामेव सौवर्णशकटिकां देहि।

रदनिका - (सानिर्वेदं निःश्वस्य)

जात! कुतोऽस्माकं सुवर्णव्यवहारः? तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि।

16. रदनिका कं गृहीत्वा प्रविशति ?

क. सुवर्णं ख. दारकं ग. शकटिकां घ. मृत्तिकां

17. "एहि वत्स! शकटिकया क्रीडावः।" इति का कथयति?

क. माता ख. पुत्री ग. रदनिका घ. राधिका

18. मृत्तिकाशकटिका कस्य आसीत्?

क. रदनिकायाः ख. दारकस्य ग. सुवर्णस्य घ. तातस्य

19. 'शकटिकया' इति पदे का विभक्तिः?

क. तृतीया ख. चतुर्थी ग. पञ्चमी घ. षष्ठी

20. 'निःश्वस्य' इति पदे कः प्रत्यय:?

क. क्त्वा ख. ल्यप् ग. क्त घ. तव्यत्

schools.aglasem.com

aglasem.com

खण्ड-ग

अनुप्रयुक्तव्याकरणम्

उचितविकल्पेभ्य: रिक्तस्थानानि पूरयत-

21. रामः ----- सह गच्छति।

क. सीता ख. सीतया ग. सीता घ. सीतायाः

22. ------- परितः वृक्षाः सन्ति।

क. गृहस्य ख. गृहेन ग. गृहानि घ. गृहं

23. ------- संस्कृतं रोचते।

क. मम ख. मया ग. मह्यं घ. अहम्

24. स् + अ + म् + स् + क् + ऋ + त् + अ + म् = -----

क. संस्कृतम् ख. संस्कृतिः ग. संस्कृते घ. संस्कृत

25. कर्म = -------

क. क् + अ + र् + अ + म्

ख. क् + र् + अ + म्

ग. क् + अ + र् + म् + अ

घ. क् + अ + र् + अ + म् + अ

26. 'प' इति वर्णस्य उच्चारणस्थानं किम् अस्ति?

क. दन्त: ख. कण्ठः ग. ओष्ठः घ. नासिका

27. तालव्यवर्णः कः अस्ति?

क. द ख. श ग. म घ. ट

28. 'म' इति कीदृशः वर्णः अस्ति?

क. दन्त्य ख. ओष्ठ्य ग. तालव्य घ. मूर्धन्य

29. गम् धातो: लृट्लकारे प्रथमपुरुषबहुवचने किं रूपं भवति?

क. गमिष्यति ख. गच्छन्ति ग. गच्छतः घ. गमिष्यन्ति

30. 'पठति' इति क्रियापदस्य बहुवचने किं रूपं भवति?

क. पठन्ति ख. पठतः ग. पठामः घ. पठसि

31. 'लिखतु' इति कस्य लकारस्य रूपम् अस्ति?

क. लङ् ख. लोट् ग. लट् घ. लृट्

32. बालकशब्दस्य षष्ठीविभक्ते: एकवचने किं रूपम् अस्ति?

क. बालकः ख. बालकस्य ग. बालके घ. बालकानाम्

33. पितृशब्दस्य तृतीयाविभक्ते: एकवचने किं रूपं भवति?

schools.aglasem.com

aglasem.com

क. पिता ख. पितु: ग. पित्रा घ. पितरम्

34. सदा + एव = ------

क. सदैव ख. सदाएव ग. सदेव घ. सदएव

35. महा + ऋषि: = ------

क. महाऋषि ख. महर्षि: ग. महर्षी: घ. महर्सी:

खण्ड-घ

रचनात्मककार्यम्

उचितविकल्पं चिनुत-

36. रामायणस्य लेखकः कः?

क. वेदव्यासः ख. विष्णुशर्मा ग. वाल्मीकिः घ. श्रीहर्षः

37. हितोपदेशः कस्य रचना अस्ति?

क. नारायणपण्डितस्य ख. वेदव्यासस्य ग. श्रीहर्षस्य घ. दाराशिकोहस्य

38. प्रधानाचार्यं प्रति लिखितं पत्रं कीदृशं पत्रं भवति?

क. संदेशं ख. अनौपचारिकं ग. औपचारिकं घ. संवादं

39. नाटकस्य अन्तः केन भवति ?

क. भरतवाक्येन ख. सरलवाक्येन ग. कठिनवाक्येन घ. भाषणेन

40. छन्दरहितं काव्यं --------- कथ्यते।

क. पद्यकाव्यं ख. गद्यकाव्यं ग. चम्पूकाव्यं घ. महाकाव्यं

schools.aglasem.com

aglasem.com